अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ९१.

श्रीसेतुलक्ष्मीप्रसादमाला

ग्रन्थाङ्कः ३.

श्रीवराहमिहिराचार्यप्रणीतं

होराशास्त्रं

श्रीरुद्रविरचितेन विवरणेन

समेतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

के. साम्बशिवशास्त्रिणा

संशोधितम् ।

तच्च


अनन्तशयने

महामहिमश्रीसेतुलक्ष्मीमहाराज्ञीशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः ११०२, क्रैस्ताब्दाः १९२६.



श्रीपद्मनाभसेवि-
न्यखिलश्रीवर्धनी महाराज्ञी ।
श्रीसेतुलक्ष्म्यभिख्या
प्रत्यक्षा जयति वश्चिभूलक्ष्मीः ॥

ग्रन्थावलिरियमिन्धे
प्रसाधिता तत्प्रसादगुणगुम्फा ।
श्रीसहितसेतुलक्ष्मी-
प्रसादमाला सुवर्णमणिचित्रा ॥

PREFACE.

This edition is based on the following three palm leaf manuscripts.

1. क. Belonging to the Palace Library, Trivandrum.
2. ख. Lent by Mr. Govinda Pisharoti, Kailasapuram, Vaikkam.
3. ग. Do. Srikumaran Moothathu, Ayankudi, Kaduthuruthi.

The colophons in these manuscripts show that the name of the commentary is Vivaraṇa, and its author Rudra; while the following verses at the end of the manuscript ख furnish certain facts regarding the date and nativity of the commentator.

"कृत्वा रुक्मिसहोदरीकमितरि प्रावण्यपूतं मन-
स्तद्विभ्रम्य गिरा वराहमिहिरोक्तैरर्थनामिश्रया ।
सत्स्वीकृत्यनुविद्धमागमिकताप्राणं सुधीदं (?) प्रिया-
यार्थं व्याकृषि वास्तवज्ञसदनो नन्वल्पयाहं धिया ॥
भद्राशीर्निधृताद्य हि मकरेऽर्के बुधोदये ।
इदं होराविवरणं रुद्रेण सुसमापितम् ॥"

The manuscript क runs up to the end of 26th chapter. It is written on palm leaves in Malayalam characters and looks about three centuries old. It is almost free from errors. The commentary in this manuscript unlike in the other two mentions the name of the metre etc. in the text.

The manuscript ख having been returned to the owner soon after transcription, no description is given here.

The manuscript ग consists of Vivaraṇa, running up to the end of the 24th adhyāya with only a Malayalam commentary on the 25th. The commentary on the 26th chapter is incomplete; and at the end of the manuscript is found fragment of a Malayalam commentary on the 8th chapter. It is written on palm leaves in Malayalam characters. It is about two centuries old and is full of errors.

K. SĀMBASIVA SĀSTRI.

INTRODUCTION.

The Hora śastra of Varāhamihira is now published in the Trivandrum Sanskrit Series, along with the commentary of Rudra. The Jyotis śāstra consists of three branches viz., Ganita, Samhitā and Horā; and the last branch can be further classified as Jātaka, Praśna, Muhūrta and Nimitta. The present work apparently treating of Jātaka, includes in its scope the other topics also; and hence, it seems, the significant title Brhajjātaka (lit., the bigger Jātaka).

The Horā śāstra is said to reveal to us the matured state of good and bad actions of men in their previous existences, ready to bear fruit, as is evident from,

"कर्मार्जितं पूर्वभवे सदादि
यत् तस्य पक्तिं समभिव्यनक्ति।" (p. 9).

In respect of its terse and laconic style containing depth of sense, the work approaches the sūtras of Pāṇini; and being suited to the needs and taste of students it has superseded the treatises on Hora by Maya, Yavana, Manjuha, Śaktipūrva and others as the following verse shows:—

"भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञस्यये
शास्त्रव्यायसमन्वितेषु बहुषः शास्त्रेषु दृष्टेष्वपि।
होरातन्त्रमहार्णवप्रतरणे नक्षोद्यमानामहं
स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रञ्चवं प्रारभे॥" (p. 8).

The peculiar popularity of the work is also due to the fact that it contains, in a nutshell, all that is essential in the works on the subject by ancient teachers.

The author is known to have flourished about the middle of the 6th century A. D. The following verse makes it certain that he was born of the Kapiṣṭhila gotra in the Avanti country and received his education from his father and guru named Ādityadāsa.

"आदित्यदासतनयस्तदवाप्तबोधः
कापिष्ठिलः सविवृतलब्धवरप्रसादः।
आवन्तिको मुनिमतान्यवलोक्य सम्यग्
होरां वराहमिहिरो रुचिरां चकार॥" (p. 327).

He is known to have written the following works on the different branches of the Jyotiṣ śāstra.

1. Pancasiddhānta
2. Laghujātaka

3. Bṛhadyātrā
4. Bṛhadvivāhapaṭala
5. Bṛhatsamhitā.

Treading the track of his predecessors the author reveals his high veneration for them, as is shown by the following extracts.

(1) "मयवनमणिन्थशक्तिपूर्वै-
दिवसकरादिषु वत्सराः प्रदिष्टाः ।" (p 130).

(2) "सत्स्वर्धं हसति ततस्त्वथैकगाना-
मेकोंऽशं हरति बलीत्यथाह सत्यः ॥" (p. 132).

(3) "आयुर्दायं विष्णुगुप्तोऽपि चैवं
देवस्वामी सिद्धसेनश्च चक्रे ।" (p 137).

(4) 'स्वमतेन किलाह जीवशर्मा
ग्रहदायं परमायुषः स्वरांशम् ।" (p. 139).

(5) 'म्लेच्छा दुर्यवनाः स्वतुङ्गगैः
क्रूरैः क्रूरमतिर्महीपतिः ।" (p. 186).

It can be seen from the following extracts that all the subsequent writers on astrology refer to the work as a great authority and regard the author as an incarnation of the sun.

(1) "यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्योतिषां
तस्योच्छित्तिभयात् पुनः कलियुगे संसृत्य यो भूतलम् ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते ॥"
(Bhaṭṭōtpala's commentary on the Hōrā).

(2) "ज्योतिश्शास्त्रमिदं विधाय विपुलं त्रिस्कन्धभिन्नं पुरा
लोकानां मतिमान् यतः कलियुगे तत्पातभीत्या पुनः ।
स्वल्पं तत् सकलं ततो रचितवानादित्यदासात्मजो
भूत्वा यो मिहिरो वराहमिहिरं नाम्ना नमस्कुर्महे ॥"
(Daśādhyāyi, a commentary on the Horā).

(3) "यः शास्त्रं विपुलं चकार विततैः स्कन्धैस्त्रिभिर्ज्योतिषां
तस्योच्छित्तिभयात् स्वयं कलियुगे संश्रित्य यो भूतलम् ।
भूयः स्पष्टतरं वराहमिहिरव्याजेन संक्षिप्तवान्
लोकानुग्रहमूर्त्तये भगवते तस्मै नमो भास्वते ॥" (p. 96).

An erudite commentary named Vivaraṇa by Rudra is added to the work. From the fact that the commentator is called in this country by the names Uzhutra Vāryar and Iṭṭutra Vāryar, which are apparently Malayalam corruptions

of the Sanskrit term Rudra, it can be surmised that he was a native of Kerala. Besides, the people called Vāryars are exclusively found to be natives of Kērala which, it is well-known, was the seat of many learned men in ancient days who made the study of astrology and medicine their speciality.

From the verse,

"भद्राशीर्निर्धृताद्यह्नि मकरेऽर्के बुधोदये।
इदं होराविवरणं रुद्रेण सुसमापितम्॥"

it is evident that the commentary was written on a Wednesday of the month Makara when the date indicated by the chronogrmme 'भद्राशीर्निर्धृताद्य' coincides. The chronogramme, however, when taken as Kalidina comes to 1690524 which happens to be Monday the 16th in the month of Karkatakam of 702 of the Kollam Era (1527 A. D). It is therefore taken, though in quite a new way as indicating the Kollam year, month and date which is Wednesday the 24th of the 6th month of the year 170 (995 A. D). To ignore the words 'भद्राशीर्निर्धृताद्य' of the author and to guess out any possible alteration of the text so as to suit the Kalidina is inadmissible.

The commentary is quoted* as authority in the Praśnamārga written in 825 K. E. (1650 A. D.); and this fact itself makes it clear that it is about four centuries old. And even if we take the chronogramme as representing the Kalidina (702-12-16), either admitting or ignoring the disparity of Wednesday in Makara, there is every chance of the commentary being four centuries old.

Nīlakaṇṭha in his Bhāṣya on the Āryabhaṭīya, mentions† a Rudra as one of the teachers of Parameśvara who wrote Dṛggaṇita about the beginning of the 15th century A. D. If this Rudra is the same as the author of Vivaraṇa, his date may be assigned to the latter part of the 14th century A. D. As the chronogramme ends with the word अह्नि it seems natural to take it as representing Kali days; and if it is read as भद्रागी instead of भद्राशी as there is small difference between the Malayalam characters ग and श, it comes to 1690324 Kali days corresponding to the 13th ghatika of the 29th day in the month of Dhanu of the Kollam year 702 (1527 A. D.); and in case the Saṅkrānti happened on

---

* 'न्यायः सर्वगृहेष्वयं विवरणे प्रोक्तोऽथ सोऽप्युच्यते।'

† "परमेश्वरस्तु रुद्रपरमेश्वरात्मज-नारायण-माधवादिभ्यो गोलविद्भ्यो गणित-गोलयुक्तीरपि बाल्य एव सम्यग् गृहीत्वा दृग्गणितं करणं चकार।"

the same day, then the makarārka, the first day and Wednesday would also coincide.

There is another commentary on the work called Daśādhyāyī written by Govinda Somayāji. As this ends with the 10th chapter it cannot be said to serve the objects expected of a commentary. In the first two adhyāyas of both these commentaries are however found some parallel passages* which give rise to the inference that one of them must have been indebted to the other.

Bhaṭṭotpala's commentary named Bṛhajjātakavivṛti is narrow in its scope and is far from making the appearance of Vivaraṇa superfluous.

From the references† to Vyākaraṇa, Mīmāmsā and Yoga śāstras, the commentator appears to be wellversed in those branches of knowledge.

---

* "मेषादयः क्रमेण क्रियादिसंज्ञा भवन्ति । अत्राष्टानां क्रियादीनां समासः । तौक्षिकादयो व्यस्ताः प्रोक्ताः । तेनायमर्थः सूचितः—आत्माद्यष्टभावानां धर्मादिचतुर्भावसापेक्षत्वम् आत्मनो धर्मसापेक्षत्वं धनस्य प्रवृत्तिसापेक्षत्वं पराक्रमस्यार्थागमसापेक्षत्वं सुखस्य धनव्ययसापेक्षत्वं सुखसिद्धेर्धर्मसापेक्षत्वं शत्रुक्षयस्य प्रवृत्तिसापेक्षत्वं कलत्रसुखस्यार्थागमसापेक्षत्वं मरणरोगपराभवादावर्थनाशसापेक्षत्वम् इति" ॥

(Vivaraṇa p. 17).

संज्ञासंविधानमाह—क्रियेति । मेषादीनां क्रियादयः संज्ञा उक्ताः । अथाष्टादीनां क्रियादीनां समासः । तौक्षिकादयो व्यस्ताः प्रोक्ताः । तेनायमर्थः सूचितः —आत्माद्यष्टभावानां धर्मादिचतुर्भावसापेक्षत्वम् आत्मनो धर्मसापेक्षत्वं धनस्य प्रवृत्तिसापेक्षत्वं पराक्रमस्यार्थागमसापेक्षत्वं सुखस्य धनव्ययसापेक्षत्वं सुतसिद्धेर्धर्मसापेक्षत्वं शत्रुक्षयस्य प्रवृत्तिसापेक्षत्वं कलत्रसुखस्यार्थागमसापेक्षत्वं मरणरोगपराभवादेरर्थनाशसापेक्षत्वम् इति ।

(Daśādhyāyī).

† "प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥" (p. 2).

"विशेषणमात्रप्रयोगे विशेष्यप्रतिपत्तिः" (p. 141).

"वस्तिद्वारे विपन्नायाः कुक्षिः प्रस्पन्दते यदि ।
जन्मकाले ततः शीघ्रं पाटयित्वोद्धरेच्छिशुम् ॥" (p. 73).

"मूलाधारोद्गतो वह्निर्द्वादशान्तमुपाश्रितः ।
पीयूषवर्षपूर्णात्मा कामदो नतु मोक्षदः ॥
स एवोर्ध्वगतस्तस्मादपवर्गाय सम्भवेत् ।" (p. 5).

It is a matter of extreme satisfaction for us that we are now in position to publish this learned commentary in the Trivandrum Sanskrit Series. A work on Jyotiṣa named Goladīpikā has already been published (No. 49. T. S. S); and we hope to enrich the series by publishing more works on the subject.

K. SĀMBASIVA SĀSTRĪ.

उपोद्घातः ।

अस्य होराशास्त्रग्रन्थस्य प्रकाशने संशोधनावलम्बा आदर्शास्त्रयः । तत्रैकः क.संज्ञितो राजकीयग्रन्थशालीयः ।

द्वितीयः ख.संज्ञितो व्याघ्रालयान्तर्गतकैलासपुरनिवासिगोविन्दपिषारोटिसम्बन्धी ।

तृतीयः ग.संज्ञितः कटित्तिरुत्ति-आयाङ्कुटि-चोलिक्करभवनाधिपतिश्रीकुमारनमूत्ततुस्वामिकः ।

त्रिष्वप्येषु सामान्यतस्तत्तदध्यायपरिसमाप्तिवाक्याद् विवरणमिति व्याख्याननामधेयं, रुद्र इति तत्कर्तृनामधेयं चावगम्येते ।

विशेषतस्तु ख.संज्ञितग्रन्थसमाप्तौ दृश्यमानेन

"कृत्वा रुक्मिसहोदरीकमितरि प्रावण्यपूतं मन-
स्तद्विभ्रम्य गिरा वराहमिहिरोक्तेरर्थनामिश्रया ।
सत्वीकृत्यनुविद्धमागमिकताप्राणं सुधीदं(?) प्रिया-
यार्थं व्याकृषि वास्तवज्ञसदनो नन्वल्पयाहं धिया ॥

भद्राशीर्निधृताब्धि मकरेऽर्के बुधोदये ।
इदं होराविवरणं रुद्रेण सुसमापितम् ॥"

इति सन्दर्भेण ग्रन्थकर्तुर्निवासभवनं नामधेयं जीवितसमयश्च शक्यान्यवधारयितुम् ।

अत्र क.संज्ञित आदितः षड्विंशतिमध्यायान् यावदविकलं स्वरूपमुपलभ्यते । प्रायः शुद्धपाठोऽयमादर्शस्तत्र तत्र विवरणे मूलश्लोकसम्बन्धिवृत्तनामधेयनिवेदनपुरस्सरैरवतारिकादिभिरितराभ्यां विशिष्यते ।

अथ चायं व्यक्तविस्तृतिभिर्लिखितस्तिदीर्घैः प्रायो वह्निवेधचिह्नितोभयाक्षरैः प्रतिपङ्क्ति मार्कां पादोनग्रन्थत्रयनिविष्टपङ्क्तिदशकात्मभिः केरलीयलिपिभिरेकावशाधिकद्विशतसङ्ख्यैस्तालपत्रपुटै रूपितत्रिशतवर्षवृद्धः प्रतिभाति ।

ख.संज्ञितः प्रतिरूपणानन्तरं तत्स्वामिने प्रतिसमर्पित इति न विशिष्य निरूपयितुं शक्यः ।

ग.संज्ञितस्त्वादितश्चतुर्विंशतेरध्यायानां प्रस्तुतेन विवरणेन, ततः पञ्चविंशस्य केनापि कैरलीव्याख्यानेन, षड्विंशस्य विंशकलितव्याख्यानश्लोकसङ्घटनेन, सर्वान्ततो होराशास्त्रीयाष्टमाध्यायस्य कैरलीव्याख्यानघटितेन केनाप्यंशेन च लब्धाकृतिर्वर्तते । प्रायः स्खलितबहुलपाठोऽयं द्विशतवर्षपर्युषितः । अत्र च द्यङ्गुलवितानानि अध्यर्धवितस्तिदीर्घाणि च मनाग् जीर्णत्रुटितानि चत्वारिंशदुत्तरं पञ्चशतं केरलीयलिपीनि तालपत्रपुटानि दृश्यन्ते । तत्र च प्रतिपुटमष्ट पङ्क्तयः प्रतिपङ्क्ति एकैको ग्रन्थश्च विद्यन्ते ।

अनन्तशयनम्,
१०–४–१०२.

के. साम्बशिवशास्त्री.

अवतारिका ।

श्रीवराहमिहिराचार्यप्रणीतं किमपि ज्योतिर्निबन्धनमिदं होराशास्त्रं नाम श्रीरुद्रविरचितेन विवरणेन समन्वितं प्रकाश्यते । गणित-संहिता-होराभिधानैस्त्रिभिः स्कन्धैराचिताकृतेः किल महतो ज्योतिश्शास्त्रस्य कोऽप्यन्यतमः स्कन्धो भवति होरा ।

वस्तुतो जातकं प्रश्नो मुहूर्तो निमित्तमिति चतुर्भिरङ्गैः स्वरूपिताय अपि होरायाः प्रथमं जातकं सुविपुलमवशिष्टाभिव्यञ्जनक्षमं च प्रतिपाद्य बृहज्जातकमिति नाम्नान्वर्थेन स्थाने प्रथतेऽयं ग्रन्थः ।

जन्मवतां पूर्वजन्मार्जितानां सतामसतां वा कर्मणां या पाकानुगुणा फलाभिसमर्पणप्रवणता तदभिव्यञ्जनमस्य मुख्यं कृत्यम् । तदुक्तमत्रैव —

"कर्मार्जितं पूर्वभवे सदादि
यत्तस्य पक्तिं समभिव्यनक्ति ।"

(पृष्ठम्. ९)

इति ।

जाग्रत्स्वपि मयूरवनमणिन्थशक्तिपूर्वप्रमुखैः पूर्वैराचार्यैरुपनिबद्धेषु परेषु होराशास्त्रनिबन्धेष्विदमेव निबन्धनं पाणिनीयमिव वीर्यबहुलं सूत्रजालं, कार्यविपुलमाकृतिलघिष्ठमखिलादरणीयम् । तथाचोक्तमाचार्यैः —

"भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये
शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि ।
होरातन्त्रमहार्णवप्रतरणे मग्नोद्यमानामहं
स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे ॥"

(पृष्ठम्. ८)

इति ।

बहूनां प्राचामाचार्याणां मतानि यावदपेक्षमालोड्य संहृत्य च सारं सप्रमाणं प्रवृत्तस्यास्य प्रतिष्ठा काप्यन्यैव मन्ये ।

अस्य चैवंविधस्य ज्योतिर्निबन्धस्य निबन्धा **श्रीवराहमिहिराचार्यः** क्रिस्तोरनन्तरं षष्ठ्याः शताब्दास्तृतीये पादे स्वजीवितप्रकाशेन भुवं प्रकाशयामासेति ज्ञायते ।

मुक्तकण्ठमाचार्योक्तमेव प्रमाणमधिकृत्येयांस्तु भागः प्रत्यक्षो विदुषाम्—

अस्याभिजनः — **कपिष्ठिलाभिधः**

जनकः शिक्षकश्च गुरुः — **आदित्यदासः**

जन्मभूमिः — **अवन्ती**

इति । यथा —

"आदित्यदासतनयस्तदवाप्तबोधः
कापिष्ठिलः सवितृलब्धवरप्रसादः ।
आवन्तिको मुनिमतान्यवलोक्य सम्यग्
होरां वराहमिहिरो रुचिरां चकार ॥"

(पृष्ठम्. ३२७)

इमे चैतदाचार्यविरचिता अन्ये ज्योतिषग्रन्थाः —

(१) पञ्चसिद्धान्तः	—	(गणितविषयः)
(२) लघुजातकम्	—	(होरांशः)
(३) बृहद्यात्रा	—	(मुहूर्तादि) (होरांशः)
(४) बृहद्विवाहपटलः	—	,, ,,
(५) बृहत्संहिता	—	(संहिता)

इति ।

पूर्वाचार्यबहुमतेन पथा सञ्चरमाणोऽयं स्वतन्त्रस्यागमसिद्धिमान्यतामात्मनश्च विद्याविनयगौरवमसामान्यमभिव्यञ्जयति । यथा —

(१) "मयमवनमणिन्थशक्तिपूर्वै-
र्दिवसकरादिषु वत्सराः प्रदिष्टाः ।"

(पृष्ठम्. १३०)

(२) "सत्स्वर्धं हसति ततस्त्वथैकगाना-
मेकोंऽशं हरति बलीत्यथाह सत्यः ॥"

(पृष्ठम्. १३२)

(३) "आयुर्दायं विष्णुगुप्तोऽपि चैवं
देवस्वामी सिद्धसेनश्च चक्रे ।"

(पृष्ठम् . १३७)

(४) "स्वमतेन किलाह जीवशर्मा
ग्रहदायं परमायुषः स्वरांशम् ।"

(पृष्ठम् . १३९)

(५) "प्राहुर्यवनाः स्वतुङ्गगैः
क्रूरैः क्रूरमतिर्महीपतिः ।"

(पृष्ठम् . १८६)

इति ।

शास्त्रमिदमखण्डितमखिलज्योतिर्विदभ्युपगतेः सुप्रतिष्ठितम्, आचार्यश्चायं ग्रहाणामिवाधीश्वरस्तान्त्रिकाध्यक्षः साक्षान्मिहिर एवेति चाभियुक्तोक्तिमनुस्मरामः । यथा भट्टोत्पलकृतबृहज्जातकविवृतौ —

"यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्योतिषां
तस्योच्छित्तिभयात् पुनः कलियुगे संसृत्य यो भूतलम् ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते ॥"

गोविन्दसोमयाजिविरचितायां दशाध्याय्यां —

"ज्योतिश्शास्त्रमिदं विधाय विपुलं त्रिस्कन्धभिन्नं पुरा
लोकानां मतिमान् यतः कलियुगे तत्पातभीत्या पुनः ।
स्वल्पं तत् सकलं ततो रचितवानादित्यदासात्मजो
भूत्वा यो मिहिरो वराहमिहिरं नाम्ना नमस्कुर्महे ॥"

श्रीरुद्रकृते च प्रस्तुते विवरणे —

"यः शास्त्रं विपुलं चकार विततैः स्कन्धैस्त्रिभिर्ज्योतिषां
तस्योच्छित्तिभयात् स्वयं कलियुगे संश्रित्य यो भूतलम् ।
भूयः स्पष्टतरं वराहमिहिरव्याजेन संक्षिप्तवान्
लोकानुग्रहमूर्त्तये भगवते तस्मै नमो भास्वते ॥"

(पृष्ठम् . ९६)

इति ।

अथैतादृशो होराशास्त्रस्य विशदं विपुलं च विवरणाख्यानं किमपि व्याख्यानमप्यनुयदिदं प्रकाशितमवतार्यते ।

व्याख्यानस्यास्य नामधेयं विवरणमिति कर्ता चास्य रुद्रनामेति चादर्शतोऽवगम्यते । यथा —

१. "इति श्रीरुद्रकृते बृहज्जातकविवरणे द्रेक्काणाध्यायः पञ्चविंशः ।"

२. "इदं होराविवरणं रुद्रेण सुसमापितम् ।" इति

अस्य च विवरणकर्तुः उषुत्र वारियर्, इट्टुत्र वारियर् इति वा श्रूयमाणं रुद्रदेश्यं नामान्तरं केरलीयत्वं विशदयति । यद् वारर्संज्ञिता हि केरलाभिजना एव दृष्टाः । केरलाश्च प्रायो बहोः कालादारभ्य ज्योतिषायुर्वेदादिनैकतन्त्रविज्ञाननिधीनां महापण्डितानां काप्याकरभूमिरिति चानपलपनीयं तत्त्वमप्यस्य मन्ये केरलीयतया सुतरां प्रसीदति ।

अस्य च रुद्रस्य जीवितसमयनिर्धारणाय पूर्वोक्तस्व-संज्ञितादर्शगतश्लोकेनेन —

"भद्राशीर्निधृताद्यह्नि मकरेऽर्के बुधोदये"

इति परिसमाप्तिपद्यपूर्वार्धेन विवृत इव विविक्तः कोऽपि पन्थाः । येन गच्छतामस्माकमिदमिदं द्रष्टव्यं भवति । तथाहि — 'भद्राशीर्निधृताद्ये'त्यंशेन निर्दिश्यमानया कलिदिनसङ्ख्यया यावता मकरमासो बुधवारश्च सम्मिलतस्तावत्या भवितव्यम् । परन्तु इयं सा (१६९०५२४) निर्दिश्यमाना कलिदिनसङ्ख्या ७०२ तमकोलम्बवर्षे कर्कटकमासं सोमवारं चैव सङ्घटयितुं कल्पते, नतु मकरार्कबुधोदयौ । तयोः सङ्घटनमनुसृत्य चेत् कामपि निर्दिश्यमानामन्यां *गणनामुद्दिशेम, तदा १७० तमे कोळम्बवर्षे पञ्चानां मासामतीतौ चतुर्विंशे दिवसे इति शक्यमुपपादयितुम् ।

"भद्राशीर्निधृताद्यह्नी"ति पद्यस्य चायमर्थः—भद्रया आशिषा निधृते सम्भृते आद्यह्नि अहर्मुखे मकरेऽर्के मकरमासि बुधोदये बुधवारे होराविवरणं नाम इदं व्याख्यानं रुद्रेण निर्विघ्नं परिसमापितम् इति ।

* कलिदिनगणनां विना कोळम्बवर्षमासदिवसात्मिकाम् ।

अत्र च 'भद्राशीर्निधृतांघे'ति मङ्गलपरिसमाप्तिद्योतकशब्दघटनाचातुर्यमन्यथयित्वा यथाकथञ्चिद् 'भूधृते निधृताद्यह्नी'त्यादिपाठभेदकल्पनेन मकरार्कबुधोदयसङ्घटनानुगुणकलिदिनसङ्ख्यासम्पादनश्रमस्तु न क्षोदक्षमः ।

इयता विवरणकर्तायं रुद्रः १७० तमकोलम्बवर्षसमाने ए. डि. ९९५ तमे वर्षे व्याख्यानमिदं सुसमापयन् लब्धजीवितोऽभूदिति वक्तव्यं भवति । किन्तु मार्गोऽयमिदम्प्रथमः ।

८२५ तमे कोळम्बवर्षे (१६५० ए. डि.) कृतत्वेनाभ्युपगते प्रश्नमार्गे दृश्यमानेन

"न्यायः सर्वगृहेष्वयं विवरणे प्रोक्तोऽथ सोऽप्युच्यते"

इति श्लोकपादेन स्मर्यमाणमिदं विवरणं ततः प्राचीनं सत् स्वकर्तृ रुद्रस्य मार्कीं चतुःशताब्द्याः प्राचीनत्वमभिव्यङ्क्तुमलम् ।

भद्राशीरिति यथास्थितरीत्या वा मकरार्कबुधोदययोः सम्मेलनानुगुणमन्यथाकृतया वा यथाकथाचन विधया कलिदिनसङ्ख्यानिर्देशमभ्युपयतामपीदमस्य चतुःशताब्द्याः प्राचीनत्वमपरिहरणीयमेव ।

आर्यभटीयसूत्रभाष्यकारेण नीलकण्ठसोमयाजिवरेण पुनराचार्येण दृग्गणितकृतः परमेश्वरपण्डितस्य गोलविद्यासम्पत्तिप्रभवानाचार्यान् —

"परमेश्वरस्तु रुद्रपरमेश्वरात्मजनारायणमाधवादिभ्यो गोलविद्भ्यो गणितगोक्युक्तीरपि बाल्य एव सम्यग् गृहीत्वा दृग्गणितं करणं चकार ।"

इति स्मरता गृह्यमाणो रुद्रो यद्यस्मद्विवरणकारः स्यान्नाम तदा ए. डि. पञ्चदशशताब्द्याः प्रारम्भजीविनः परमेश्वरपण्डितात् प्राचीनोऽयम् ए. डि. चतुर्दशशताब्द्या उत्तरार्धजीवीत्यपि शक्यते सम्भावयितुम् ।

अत्र कश्चिदयमभ्यूहः— यद् 'अद्रि'पदस्वारस्यात् कलिदिनसङ्ख्यावश्यम्भावेन, सादृश्यभूयस्त्वमूलकलेखकप्रमादापतिते 'शे''गे'न विनिर्मीयमाने 'भद्रागीरि'ति पाठाभ्युपगतौ सम्पद्यमानयानया १६९०३२४ कलिदिनसङ्ख्यया ४६२७ तमकलिसंवत्सरसमाने ७०२ तमकोलम्बवर्षे (१५२७ तमे क्रैस्ताब्दे) कलिदिशा मेषतः अष्टानां मासामष्टाविंशतेर्दिवसानां त्रयोदशानां नाडिकानां चातिक्रमो लभ्यते । तदानीन्तनगणितप्रक्रियया यदि सूर्यसङ्क्रमोऽपि घटेत तदा मकरार्कः प्रथमदिनं बुधोदयश्चापि यथावत् प्रकल्पेरन् । अतो व्याख्यानस्यास्य चतुश्शताब्द्याः प्राचीनत्वं वक्तव्यमिति ।

जाग्रत्यपि श्रीगोविन्दसोमयाजिवर्यविरचिता दशाध्यायीसंज्ञिता व्याख्या स्वतोऽसमग्रा नास्य विवरणस्य गतार्थताशङ्काया अप्यलम्। किन्तु प्रथमयोरध्याययोस्तत्र तत्रोपलभ्यमाना समानवाक्यसरणिरनयोरन्यतरप्रभवतां विशदयतीव च। यथा—

क्रियतावुरिजितुमकुलीरलेयपार्थोनजूककोर्प्यास्ख्याः।
तौक्षिक आकोकेरो हृद्रोगश्चेर्थसिः क्रमशः॥

विवरणव्याख्या—मेषादयः क्रमेण क्रियादिसंज्ञा भवन्ति। अत्राष्टानां क्रियादीनां समासः। तौक्षिकादयो व्यस्ताः प्रोक्ताः। तेनायमर्थः सूचितः—आत्माद्यष्टभावानां धर्मादिचतुर्भावसापेक्षत्वम् आत्मनो धर्मसापेक्षत्वं, धनस्य प्रवृत्तिसापेक्षत्वं, पराक्रमस्यार्थागमसापेक्षत्वं, सुखस्य धनव्ययसापेक्षत्वं, सु(ख?त)सिद्धेर्धर्मसापेक्षत्वं, शत्रुक्षयस्य प्रवृत्तिसापेक्षत्वं कलत्रसुखस्यार्थागमसापेक्षत्वं, मरणरोगपराभवादावर्थनाशसापेक्षत्वम् इति॥ (पृष्ठम्.१७).

दशाध्यायी—संज्ञाविधानमाह—क्रियेति। मेषादीनां क्रियादयः संज्ञा उक्ताः। अथाष्टा(दी?)नां क्रियादीनां समासः। तौक्षिकादयो व्यस्ताः प्रोक्ताः। तेनायमर्थः सूचितः—आत्माद्यष्टभावानां धर्मादिचतुर्भावसापेक्षत्वम्, आत्मनो धर्मसापेक्षत्वं, धनस्य प्रवृत्तिसापेक्षत्वं, पराक्रमस्यार्थागमसापेक्षत्वं, सुखस्य धनव्ययसापेक्षत्वं, सुतसिद्धेर्धर्मसापेक्षत्वं, शत्रुक्षयस्य प्रवृत्तिसापेक्षत्वं, कलत्रसुखस्यार्थागमसापेक्षत्वं, मरणरोगपराभवादेरर्थनाशसापेक्षत्वम् इति।

श्रीभट्टोत्पलाचार्यनिबद्धा नाम्ना बृहज्जातकविवृतिर्व्याख्यापि प्रायो मूलार्थविवरणसङ्कुचितगतिर्विवरणस्यास्य प्रादुर्भावापेक्षां न मनागपि निरोदुधुमर्हति।

तत्रतत्रानुपुणैस्तन्त्रान्तरीयप्रमाणवाक्यैरुद्धरणैर्ज्योतिस्तन्त्रव्याख्यातुरप्यस्य श्रीरुद्रस्यान्येष्वपि तन्त्रेषु किमप्यसाधारणं नैपुणमभिव्यज्यते। यथा—

(१) व्याकरणम्—

"प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥"

(पृष्ठम्. २).

(२) मीमांसा —

"विशेषणमात्रप्रयोगे विशेष्यप्रतिपत्तिः ।"

(पृष्ठम्. १४१).

(३) आयुर्वेदः —

"वस्तिद्वारे विपन्नायाः कुक्षिः प्रस्पन्दते यदि ।
जन्मकाले ततः शीघ्रं पाटयित्वोद्धरेच्छिशुम् ॥"

(पृष्ठम्. ७३).

(४) योगशास्त्रम् —

"मूलाधारोद्गतो वह्निर्द्वादशान्तमुपाश्रितः ।
पीयूषवर्षपूर्णात्मा कामदो नतु मोक्षदः ॥
स एवोर्ध्वगतस्तस्मादपवर्गाय सम्भवेत् ।"

(पृष्ठम्. ५).

किं बहुना —

पण्डितवरस्यास्य **श्रीरुद्रस्य** समग्रगुणसम्पन्नमिदं ज्योतिर्विदां बहुमतं **होराविवरणमस्मदनन्तशयनसंस्कृतग्रन्थावल्यामेव** प्रथमं प्रकाश्यत इति **धन्या** वयमपि । स्वसा चास्य काचिल्लब्धावतारा नाम्ना **गोलदीपिका** (ग्रन्थाङ्कः ४९) सगोत्रमनुजं प्रतीक्षमाणापि जाता कृतार्था । इतःपरमप्येवमनेकेषां सगर्भ्याणामप्याविर्भावेन प्रमोदितुमिमे कृतभागधेये स्तामित्याशंसुरव विरमामि ।

अनन्तशयनम्,
१०-४-१०२.

के. साम्बशिवशास्त्री.

विषयानुक्रमणी ।

विषयः.	पृष्ठम्.
राशिप्रभेदाध्यायः १.	
मङ्गलाचरणम्	१
स्वव्यापारस्य लोकानुग्रहविषयत्वप्रदर्शनम्	८
होराशब्दनिर्वचनं होराशास्त्राभिधेयं च	९
कालपुरुषदेहावयवभूतराश्यंशकोपदेशः	१३
राशिस्वरूपनिरूपणम्	१४
राशिनवांशद्वादशांशाधिपतिनिरूपणम्	१५
त्रिंशांशकनिरूपणम्	१६
राशीनां पारिभाषिकसंज्ञान्तरकथनम्	१७
षड्वर्गनिरूपणम्	,,
राशीनां रात्रिदिनसंज्ञत्वं पृष्ठोदयादिकथनं च	१९
राशीनां क्रूरसौम्यादिविभागः	२०
पक्षान्तरेण होराद्रेक्काणाधिपतिलक्षणम्	२१
ग्रहाणामुच्चनीचविभागः	२२
ग्रहाणां वर्गोत्तममूलत्रिकोणपरिज्ञानम्	२३
लग्नादिद्वादशभावानां तन्वादिसंज्ञा तृतीयादीनामुपचयसंज्ञा च	२४
लग्नादीनां संज्ञान्तरकथनम्	२५
केन्द्राणां संज्ञास्तद्राशिबलं च	,,
केन्द्रान्तरालराशीनां संज्ञा	२७
लग्नादिबलनिरूपणम्	२८
राशीनां वर्णाः	२९
ग्रहयोनिभेदाध्यायः २.	
ग्रहाणां मेषादिराश्यवयविना कालपुरुषेण सम्बन्धः	३०
सूर्यादिग्रहाणां संज्ञाः	३२

विषयः.	पृष्ठम्.
ग्रहवर्णनिरूपणम्	३२
ग्रहाणां वर्णःस्वाम्यं देवतादिकथनं च	,,
ग्रहाणां प्रकृत्यादिकथनम्	३५
ग्रहाणां ब्राह्मणादिवर्णाधिपत्यं गुणविभागश्च	३६
चन्द्रार्कयोः स्वरूपम्	३८
कुजबुधयोः स्वरूपम्	३९
जीवशुक्रयोः स्वरूपम्	४०
शनैश्चरस्वरूपादिकथनम्	,,
ग्रहाणां स्थानादिकथनम्	४२
ग्रहाणां दृष्टिस्थानानि	४४
ग्रहाणां कालादिनिर्देशः	,,
ग्रहाणां निसर्गशत्रुमित्रोदासीननिरूपणम्	४६
ग्रहाणां तत्कालमित्रामित्रविभागः	४७
ग्रहाणां स्थानबलं दिग्बलं च	४८
ग्रहाणां चेष्टाबलम्	४९
ग्रहाणां कालबलं निसर्गबलं च	५०
वियोनिजन्माध्यायः ३.	
वियोनिजन्मज्ञानम्	५२
वियोनिजन्मज्ञाने योगान्तरम्	५३
वियोनिजन्तुषु चतुष्पदानामङ्केषु राशिविभागः	,,
वियोनिवर्णज्ञानम्	५४
पक्षिजन्मलक्षणम्	,,
स्थावराणां लक्षणम्	५५
वृक्षविशेषनिर्देशप्रकारः	५६
भूतरुशुभाशुभलक्षणम्	५७
निषेकाध्यायः ४.	
गर्भाधानकालः	५८

विषयः.	पृष्ठम्.
पत्योरन्योन्यसम्बन्धस्तत्प्रयोगश्च	६२
अपत्यसद्भावादिज्ञानम्	६४
आधानलग्नवशात् प्रश्नलग्नवशाद् वा स्त्रीपुंसयोराहितस्य गर्भस्य च प्रसवावधि शुभाशुभज्ञानम्	६९
पित्रादीनां शुभाशुभज्ञानम्	७०
आहितस्य गर्भस्याधारभूताया मातुररिष्टकथनम्	७२
गर्भस्य गर्भिण्याश्च निषेकादिलग्नवशादरिष्टयोगः	,,
मातुः शस्त्रनिमित्तमरणयोगज्ञानं गर्भस्रुतिज्ञानं च	७४
गर्भसौख्यलक्षणम्	७५
निषिक्तस्य निषेककालाज्जातस्य जन्मकालाद् उभयोरपि प्रश्नकालाद् वा पुंस्त्रीविभागज्ञानम्	,,
पुंजन्मयोगान्तरम्	७६
क्लीबयोगाः	७८
गर्भस्य यमलत्वादिविज्ञानम्	८०
गर्भस्य बहुप्राणिस्वरूपत्वलक्षणम्	८२
गर्भस्य मासाधिपाः	,,
गर्भस्थस्य जन्तोः पूर्वकर्मविपाकेनाज्ञानामूनातिरिक्तता	८५
कुब्जादियोगाः	८६
वामनकहीनाङ्गयोगौ	८७
नयनविनाशयोगः	८८
प्रसवकालनिर्णयः	८९
निषेककालविशेषेण प्रसवकालविलम्बः	९४

जन्माध्यायः ५.

प्रसूतिसमये पितुरवस्था	९७
जननक्रियायां सम्भाव्या विस्मापनयोगाः	९८
जारजातज्ञानम्	१००
पितृविषयो लक्षणविशेषः	१०१

विषयः.	पृष्ठम्.
जलमयदेशप्रसवलक्षणम्	१०१
अत्रैव योगान्तरम्	१०२
प्रसवस्थलविशेषः	१०३
सामान्येन प्रसवदेशज्ञानलक्षणम्	१०४
मात्रा हेतुबलात् परित्याज्यस्यापत्यस्य लक्षणम्	१०५
अत्रैव योगान्तरम्	१०६
स्वगृहपरगृहसमानस्वत्वभाविनां लक्षणम्	१०७
प्रसूतिसमयसम्भवं लक्षणम्	११०
दीपगृहद्वारलक्षणम्	११२
ग्रहवशेन सूतिकागृहलक्षणम्	११३
सूतिकागृहे भागविशेषज्ञानम्	११४
सूतिकागृहे राशिविन्यासप्रकारः	,,
उपसूतिकानिर्देशः	११५
जातस्य शिशोः शरीरलक्षणम्	११६
चरचक्रेण गात्रलक्षणम्	११७
गात्रे ग्रहवशाद् व्रणादिविशेषज्ञानम्	११९
तत्रैव योगान्तरम्	१२०
सद्योमरणाध्यायः ६.	
अरिष्टयोगः	१२१
अरिष्टान्तरम्	१२४
अरिष्टयोगविशेषे कालनिर्णयः	१२५
अनिर्दिष्टकालविशेषाणामरिष्टयोगानां कालनिर्णयः	१२९
आयुर्दायाध्यायः ७.	
पिण्डदशायां ग्रहवत्सराः	१३०
ग्रहवत्सराणां नीचहरणम्	१३१
दृश्यार्धहरणम्	१३२
क्रूरोदयहरणम्	१३३

विषयः.	पृष्ठम्.
पुरुषादीनां परमायुःप्रमाणम्	१३५
परमायुर्योगलक्षणम्	१३६
परमतायुर्दूषणम्	१३७
जीवशर्मसत्याचार्ययोर्मतेनायुर्दायः	१३९
सत्यमतेन ग्रहाणामायुर्दायानयनम्	१४१
अंशकायुषि विशेषः	,,
सत्यमतस्य प्रवरत्वम्	१४२
अमितायुर्लक्षणम्	१४३
दशाविपाकाध्यायः ८.	
ग्रहाणां दशाक्रमज्ञानम्	,,
केन्द्रादिषु ग्रहबहुत्वे दशाक्रमज्ञानम्	१४४
अन्तर्दशानयनम्	१४७
उक्तानामन्तर्दशानां गणितेनानयनम्	१४८
दशानामन्वर्थाः संज्ञाविशेषाः	१५०
लग्नदशाविशेषनिरूपणम्	१५२
निसर्गदशाक्रमो लग्नदशास्थानं च	१५३
दशारम्भकालराशिवशात् फलविशेषः	१५४
चन्द्रचारेण दशारम्भे फलविशेषः	१५५
अर्कदशाफलम्	,,
चन्द्रदशाफलम्	१५६
कुजदशाफलम्	१५७
बुधदशाफलम्	१५८
जीवदशाफलम्	,,
शुक्रदशाफलम्	१५९
मन्ददशाफलम्	१६०
दशाफलानां विषयविभागो लग्नदशाफलं च	१६१
अन्येषामपि फलानां दशास्वतिदेशः	१६२

विषयः.	पृष्ठम्.
ग्रहाणां स्वस्वभूतगुणव्यञ्जकत्वम्	१६३
दशाकाले फलभोक्तुः पुरुषस्यावस्था	१६५
एकग्रहस्य फलयोर्विरोधे निर्वाहकत्वम्	१६६
अष्टकवर्गाध्यायः ९.	
अर्काष्टकवर्गः	१६७
चन्द्राष्टकवर्गः	१७२
कुजबुधयोरष्टकवर्गः	१७३
जीवशुक्रयोरष्टकवर्गः	१७४
मन्दाष्टकवर्गः	१७५
अष्टकवर्गफलनिर्णयः	,,
कर्माजीवाध्यायः १०.	
परवशादागन्तुकार्थप्राप्तिनिरूपणम्	१८२
भेन्द्वर्काणामास्पदपतिगांशनाथवशाद् वृत्तिविशेषाः	१८३
कर्मेशाध्युषितनवांशनाथानां तत्कालस्थितिवशाद् विशेषः	१८५
राजयोगाध्यायः ११.	
अन्यमतेन पापग्रहाणां स्वतुङ्गस्थित्या फलविशेषः	१८६
द्वात्रिंशद् राजयोगाः	१८७
चतुश्चत्वारिंशद् राजयोगाः	१८८
पञ्च राजयोगाः	,,
अन्ये राजयोगाः	१८९
राजयोगे सत्यपि राजवंश्यानामेव राजत्वम् अन्येषां राजतुल्यत्वं च	१९२
राजयोगफलागमकालः	१९५
भोगिनां शबरदस्युस्वामिनां च जन्मज्ञानम्	१९६
नाभसयोगाध्यायः १२.	
नाभसयोगानां संख्याविभागः	१९७
तत्राश्रययोगाः	१९८
एतान् योगान् प्रत्यन्येषां मतम्	१९९

विषयः.	पृष्ठम्.
आकृतियोगाः	१९९
वज्रादियोगाः	,,
यूपेषुशक्तिदण्डाख्या योगाः	२०१
नावादियोगपञ्चकम्	,,
समुद्रचक्राख्ययोगौ	,,
संख्यायोगसप्तकम्	२०२
द्वात्रिंशद्योगानां क्रमेण फलकथनम्	,,
एषां फलदाने विशेषः	२०३
गदादियोगफलम्	,,
वज्रादियोगफलम्	२०४
यूपादियोगफलम्	,,
नावादियोगफलम्	,,
अर्धचन्द्रादियोगफलम्	२०५
दामिन्यादियोगफलम्	,,
युगादियोगफलम्	२०६
चान्द्रयोगाध्यायः १३.	
अर्कात् केन्द्रपणपरापोक्लिमस्थे चन्द्रे जातस्य स्वरूपम्	,,
अधियोगनिरूपणम्	२०७
सुनफादियोगचतुष्टयम्	२०८
सुनफानफाधुरुधुराणां विकल्पसङ्ख्या	२१०
सुनफानफयोः फलम्	,,
धुरुधुराकेमद्रुमयोः फलम्	२११
सुनफादियोगेषु योगकर्तृणां ग्रहाणां पृथक् फलविशेषाः	,,
शनैश्चरे योगकर्तरि जातस्य रूपम्	२१२
लग्नचन्द्रसाधारणवसुमद्योगनिरूपणम्	,,
द्विग्रहादियोगाध्यायः १४.	
अर्के चन्द्रादियुक्ते जातस्य स्वरूपम्	२१३
चन्द्रे कुजादियुक्ते जातस्य स्वरूपम्	२१४

विषयः.	पृष्ठम्.
कुजे बुधादियुक्ते जातस्य स्वरूपम्	२१५
बुधे जीवादियुक्त जीवे शुक्रादियुक्ते च जातस्य स्वरूपम्	२१६
शुक्रे शनैश्चरयुक्ते जातस्य स्वरूपं त्रिग्रहयोगफलनिर्देशप्रकारश्च	२१७
प्रव्रज्यायोगाध्यायः १५.	
चतुरादिग्रहयोगफलम्	२१८
प्रव्रज्यायोगापवादः	२१९
प्रव्रज्याविषये योगान्तरम्	२२०
प्रव्रज्यायोगविशेषः	२२१
राशिशीलाध्यायः १६.	
मेषे चन्द्रमसि मेषलग्ने च जातस्य स्वरूपम्	२२२
वृषभे चन्द्रे वृषभलग्ने च जातस्य स्वरूपम्	,,
मिथुने चन्द्रे मिथुनलग्ने च जातस्य स्वरूपम्	२२३
कर्कटके चन्द्रे कर्कटकलग्ने च जातस्य स्वरूपम्	,,
सिंहे चन्द्रे सिंहलग्ने च जातस्य स्वरूपम्	२२४
कन्यास्थे चन्द्रे कन्यालग्ने च जातस्य स्वरूपम्	,,
तुलास्थे चन्द्रे तुलालग्ने च जातस्य स्वरूपम्	२२५
वृश्चिकस्थे चन्द्रे वृश्चिकलग्ने च जातस्य स्वरूपम्	,,
धनुषि चन्द्रमसि धनुर्लग्ने च जातस्य स्वरूपम्	२२६
मकरस्थे चन्द्रे मकरलग्ने च जातस्य स्वरूपम्	,,
कुम्भस्थे चन्द्रे कुम्भलग्ने च जातस्य स्वरूपम्	२२७
मीनस्थे चन्द्रमसि मीनलग्ने च जातस्य स्वरूपम्	,,
चन्द्रस्य यथोक्तफलदानं प्रति विशेषः	२२८
मेषवृषगतेऽर्के जातस्य स्वरूपम्	२२९
मिथुनादिराशिचतुष्कस्थेऽर्के जातस्य स्वरूपम्	,,
तुलादिचतुष्कस्थेऽर्के जातस्य स्वरूपम्	२३०
कुम्भमीनगतेऽर्के जातस्य स्वरूपम्	२३१
स्वर्क्षशुक्रर्क्षयोः स्थिते कुजे जातस्य स्वरूपम	,,
बुधचन्द्रक्षेत्रगते कुजे जातस्य स्वरूपम्	२३२

विषयः.	पृष्ठम्.
रविगुरुमन्दर्क्षगते कुजे जातस्य स्वरूपम्	२३२
कुजशुक्रक्षेत्रगते बुधे जातस्य स्वरूपम्	२३३
मिथुनकर्कटस्थे बुधे जातस्य स्वरूपम्	,,
सिंहकन्यास्थिते बुधे जातस्य स्वरूपम्	२३४
गुरुमन्दक्षेत्रगते बुधे जातस्य स्वरूपम्	,,
कुजभृगुबुधक्षेत्रगते गुरौ जातस्य स्वरूपम्	२३५
चन्द्ररविगुरुमन्दर्क्षगते जीवे जातस्य स्वरूपम्	,,
कुजर्क्षे स्वर्क्षे च स्थिते शुक्रे जातस्य स्वरूपम्	२३६
बुधमन्दक्षेत्रगते शुक्रे जातस्य स्वरूपम्	,,
चन्द्ररविगुरुक्षेत्रगते शुक्रे जातस्य स्वरूपम्	२३७
कुजबुधर्क्षस्थे मन्दे जातस्य स्वरूपम्	,,
शुक्रेन्दुसूर्यर्क्षगते मन्दे जातस्य स्वरूपम्	,,
गुरुस्वर्क्षगते मन्दे जातस्य स्वरूपम्	२३८
मेषादिषु लग्नेषु चन्द्राक्रान्तराश्युक्तस्वरूपातिदेशः	,,
दृष्टिफलाध्यायः १७.	
मेषादिचतुष्कस्थे चन्द्रे कुजादैर्दृष्टे जातस्य फलविज्ञानम्	२४१
सिंहादिचतुष्कस्थे चन्द्रे बुधादैर्दृष्टे जातस्य फलविज्ञानम्	२४२
चापादिचतुष्कस्थे चन्द्रे बुधादैर्दृष्टे जातस्य फलविज्ञानम्	,,
वीक्षणफलतारतम्यम्	२४३
कुजशुक्रनवांशस्थस्य चन्द्रमसोऽर्कादिदृष्टस्य फलम्	२४४
बुधनवांशस्थे चन्द्रे सूर्यादिदृष्टे फलम्	,,
रविगुरुनवांशस्थे चन्द्रमसि सूर्यादिदृष्टे फलम्	२४५
मन्दनवांशस्थे चन्द्रमसि सूर्यादिदृष्टे फलम्	,,
अंशकफलतारतम्यम्	२४६
भावाध्यायः १८.	
आदित्यस्य लग्नगतस्य द्वितीयस्थस्य च फलम्	२४७
लग्नात् तृतीयादिभावचतुष्कस्थितस्यार्कस्य फलम्	२४८

विषयः.	पृष्ठम्.
सप्तमादिभावषट्कस्थितस्यार्कस्य फलम्	२४८
लग्नादिभावषट्कस्थितस्य चन्द्रस्य फलम्	२४९
सप्तमादिभावषट्कस्थितस्य चन्द्रस्य फलम्	,,
लग्नादिद्वादशभावस्थितयोर्भौमबुधयोः फलम्	२५०
लग्नादिद्वादशभावस्थितस्य जीवस्य फलम्	,,
लग्नादिद्वादशभावस्थयोः शुक्रमन्दयोः फलम्	२५१
लग्नादिद्वादशभावस्थितानां ग्रहाणां फलविशेषः	२५२
निर्देष्टव्येषु शुभाशुभेषु तारतम्यक्रमः	२५४
आश्रययोगाध्यायः १९.	
ग्रहाणां स्वक्षेत्रत्वादिगुणविशिष्टराशिफलानि	२५६
स्वोच्चस्थस्यैकस्यापि ग्रहस्य फलम्	,,
कुम्भलग्नजातस्याशुभफलत्वम्	२५७
ग्रहाणां सूर्यादिहोरायोगफलम्	२५८
द्रेक्काणफलम्	२५९
नवांशकफलम्	,,
स्वत्रिंशांशस्थानां भौमसौरजीवसौम्यानां फलम्	२६०
स्वत्रिंशांशस्थस्य शुक्रस्य भौमादित्रिंशांशस्थयोश्चन्द्रार्कयोश्च फलम्	२६१
प्रकीर्णाध्यायः २०.	
ग्रहाणामन्योन्यकारकत्वम्	,,
कारकत्वविशेषः	२६२
वर्गोत्तमादौ शुभत्वनिरूपणम्	२६३
केन्द्रस्थेषु ग्रहेषु विशेषः	,,
ग्रहाणां चारफलस्य कालावशेषः	२६४
अनिष्टयोगाध्यायः २१.	
सुतहीनजन्मज्ञानम् ।	,,
भार्यामरणयोगत्रयम् ।	२६६
विकलदारजन्मज्ञानम्	२६७